## (160) " कत्थ श्लाघायाम् " (I-भ्वादिः-37. अक. सेट्. आत्म.)

श्लाघा-गुणारोपः, इति क्षीरस्वामी ।

कत्थकः-त्थिका, कत्थकः-त्थिका, चिकत्थिषकः-षिका, चाकत्थकः-त्थिका ;
कत्थिता-त्री, कत्थयिता-त्री, चिकत्थिषिता-त्री, चाकत्थिता-त्री ;
— कत्थयन्-न्ती, कत्थयिष्यन्-न्ती-ती ; —
विकत्थमानः, कत्थयमानः, चिकत्थिषमाणः, चाकत्थ्यमानः ;
कत्थिष्यमाणः, कत्थयिष्यमाणः, चिकत्थिषिष्यमाणः, चाकत्थिष्यमाणः ;
[1]कत्-कत्थौ-कत्थः ; — — —
कत्थितम्-तः, कत्थितम्-तः, चिकत्थिषितः, चाकत्थितः-तवान् ;
कत्थः, [2]विकत्थी,[A] विकत्थनः,[3] चिकत्थिषुः, चिकत्थयिषुः, चाकत्थः ;
कत्थितव्यम्, कत्थयितव्यम्, चिकत्थिषितव्यम्, चाकत्थितव्यम् ;
कत्थनीयम्, कत्थनीयम्, चिकत्थिषणीयम्, चाकत्थनीयम् ;
कत्थ्यम्, कत्थ्यम्, चिकत्थिष्यम्, चाकत्थ्यम् ;
ईषत्कत्थः-दुष्कत्थः-सुकत्थः ; — —
कत्थ्यमानः, कत्थ्यमानः, चिकत्थिष्यमाणः, चाकत्थ्यमानः ;
कत्थः, कत्थः, चिकत्थिषः, चाकत्थः ;
कत्थितुम्, कत्थयितुम्, चिकत्थिषितुम्, चाकत्थितुम् ;
कत्था, कत्थना, चिकत्थिषा, चिकत्थयिषा, चाकत्था ;
[B]कत्थनम्, कत्थनम्, चिकत्थिषणम्, चाकत्थनम् ;
कत्थित्वा, कत्थयित्वा, चिकत्थिषित्वा, चाकत्थित्वा ;
विकत्थ्य, विकत्थ्य, प्रचिकत्थिष्य, प्रचाकत्थ्य ;
कत्थम् २ } कत्थम् २ } चिकत्थिषम् २ } चाकत्थम् २ ;
कत्थित्वा २ } कत्थयित्वा २ } चिकत्थिषित्वा २ } चाकत्थित्वा २ ;

1. 'संयोगान्तस्य लोपः' (8-2-23) इति थकारस्य लोपः ।
2. 'वौ कषलसकत्थस्रम्भः' (3-2-143) इति ताच्छीलिको घिनुण् ।
3. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति युच् ताच्छीलिकः ।
'वाऽसरूपोऽस्त्रियाम्' (3-1-94) इत्यनेन कदाचित् युजपि ।

A. 'विकत्थी याचते प्रत्तमविस्रम्भी मुहुर्जलम् ।' भ. का 7-11.

B. 'स वेथते स्माखिलवेथितं विधिं प्रश्रन्थितग्रन्थनधीरकत्थनः ।
अतेन्मुरारिर्मम चिन्मयोऽन्तिके च्योतन् दिशः प्रच्युतितैः स्मितामृतैः ॥'
धा. का. 1-6.